# Atmeshvaratattvapancharatnam

# आत्मेश्वरतत्त्वपञ्चरत्नम्

## Document Information

Text title : Atmeshvaratattvapancharatnam

File name : Atmeshvaratattvapancharatnam.itx

Category : shiva, pancharatna

Location : doc_shiva

Author : Vyasa

Proofread by : Aruna Narayanan

Description/comments : From Atmanatha Stuti Manjari, Ed. S. V. Radhakrishna Sastri

Latest update : December 12, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2022

*sanskritdocuments.org*

# आत्मेश्वरतत्त्वपञ्चरत्नम्

(व्यासकृतम्)
षडाधारोर्ध्वसन्निष्ठं षडुत्कर्षस्थलेश्वरम् ।
षड्भारमणं वन्दे षडध्वाराधनक्षमम् ॥ १॥

श्रीमत्श्रीकुन्दमूलस्थललसितमहायोगपीठे निषण्णः
सर्वाधारो महात्माऽप्यनुपमितमहास्वादिकैलासवासी ।
यस्यास्ते कामिनी या नतजनवरदा योगमाता महेशी
सोऽव्यादात्मेश्वरो मां शिवपुररमणः सच्चिदानन्दमूर्तिः ॥ २॥

यो वेदान्तविचिन्त्यरूपमहिमा यं याति सर्वं जगत्
येनेदं भुवनं भृतं विधिमुखाः कुर्वन्ति यस्मै नमः ।
यस्मात् सम्प्रभवन्ति भूतनिकराः यस्य स्मृतिर्मोक्षकृत्
यस्मिन् योगरतिःशिवेति स महानात्मेश्वरः पातु नः ॥ ३
तुर्यातीतपदोर्ध्वगं गुणपरं सत्तामयं सर्वगं
संवेद्यं श्रुतिशीर्षकैरनुपमं सर्वाधिकं शाश्वतम् ।
ओङ्कारान्तरबिन्दुमध्यसदनं ह्रीङ्कारलभ्यं नुमो
व्योमाकारशिखाविभाविमुनिसन्दृश्यं चिदात्मेश्वरम् ॥ ४॥

वेदान्तार्थविचक्षणैरतितरां ब्रह्मेति यः कथ्यतेऽ-
प्यन्यैर्योगिजनैर्महापुरुष इत्यष्टाङ्गिभिश्चिन्तितः ।
कैश्चिल्लोकविपत्तिकृत्त्रिनयनःश्रीनीलकण्ठः स्मृतः
तं वन्दे परमात्मनाथमनिशं कुन्दद्रुमाधः स्थितम् ॥ ५॥

इति व्यासकृतं श्रीमदात्मेश्वरतत्त्वपञ्चरत्नं सम्पूर्णम् ।

Proofread by Aruna Narayanan

*Atmeshvaratattvapancharatnam*

pdf was typeset on December 22, 2022

Please send corrections to *sanskrit@cheerful.com*